॥ श्रीसीतारामचन्द्राभ्यां नमः ॥
॥ श्रीमते रामानन्दाचार्याय नमः ॥
॥ श्रीमद्गोस्वामितुलसीदासाय नमः ॥

अथर्ववेदीय पिप्पलीय शाखा

॥ सर्व्योपनिषद् ॥

This text has been prepared by
Vishal Pandey (B.Tech IIT Kanpur)
with the blessings of
Chitrakūṭa Tulasīpīṭhādhiśvara
Jagadguru Rāmānandāchārya
Śrī Svāmī Rāmabhadrāchārya

सीतानाथ समारम्भां रामानन्दार्य मध्यमाम्।
अस्मदाचार्य पर्यन्तां वन्दे श्री गुरु परम्पराम्॥

अथ सख्योपनिषद्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ १ ॥ ॐ शान्तिः शान्तिः शान्तिः ॐ क्वचित्समये सनकादयश्शेषं प्रति जग्मुः। कथं नु भगवन् पुरुषं वेदज्ञा भक्त्या पश्यन्ति प्राप्नुवन्ति तेन सह क्रीडन्ति। सहोवाच। सख्यरसेनैव ॥ २ ॥ श्रुत्वा पुनरूचुः। भगवन् क्व स रसः प्राकृतोऽप्राकृतो वा। सहोवाच। अप्राकृतः प्रकृतिपरश्च सख्यस्यैव बह्नूनि पर्यायनामानि सन्ति ॥ ३ ॥ विश्वासः श्रद्धा श्रद्धाविश्वासः प्रकृतिः। सत्यंज्ञानमनन्तं ब्रह्म तद्ब्रह्म सख्यरसात्मकः। श्रीराम एव रसोवैसः ॥ ४ ॥ यस्यदासरसोवैपादः ॥ ५ ॥ यस्य शान्तरसो वै शिरः ॥ ६ ॥ वात्सल्यः प्राणः ॥ ७ ॥ शृङ्गारो बाहू ॥ ८ ॥ सख्यात्मा ॥ ९ ॥ सख्यरसाज्जायन्ते परव्यूहविभवान्तर्य्याम्यर्चावताराः। सख्यरसान्महाविष्णुर्जायते। सख्यरसान्महाब्रह्मा जायते। सख्यरसान्महारुद्रो जायते। सख्यरसात्परमात्मा जायते।सख्यरसान्महालक्ष्मीर्जायते। सख्यरसान्महामायाजायते। सख्यरसादाद्याशक्तिर्जायते। सख्यरसात्सखा जायते। सख्यरसाद्वासुदेवो जायते। सख्यरसात्क्षीरशायी जायते। सख्यरसात्सर्वेश्वराः जायन्ते। सध्यरसात्सर्वेऽवताराः जायन्ते। सख्यरसान्नृसिंहो जायते। सख्यरसाद्वराहो जायते। सख्यरसान्मत्स्यकच्छपौ जायेते। सख्यरसात्कल्किबौद्धौ जायेते। सख्यरसाद्वामनो जायते। सख्यरसात्परशुरामो जायते। सख्यरसाच्छ्रीकृष्णो जायते। सख्यरसाद्बलरामो जायते। सख्यरसाद्विष्णुर्जायिते। सख्यरसान्महादेवो जायते। सख्यरसाद्ब्रह्मा जायते। सख्यरसान्महेन्द्रो जायते। सख्यरसादिन्द्रो जायते। सख्यरसात्सर्वेदेवाः जायन्ते। सख्यरसात्सर्वाः शक्तयो जायन्ते। सख्यरसाच्छेषो जायते। सख्यरसाद्गणेशो जायते। सख्यरसाद्वरुणो जायते। सख्यरसात्सोमो जायते। सख्यरसादग्निर्जायते। सख्यरसात्सूर्यो जायते। सख्यरसाद्यमो जायते। सख्यरसात्कल्पवृक्षो जायते। सख्यरसात्कामो जायते सख्यरसात्कामधेनुर्जायते। सख्यरसाद्धनदो जायते। सख्यरसात्सर्वेमरूताः जायन्ते। सख्यरसात्सर्वे गन्धर्वाः जायन्ते। सख्यरसात्सर्वेविद्याधराः जायन्ते। सख्यरसात्सर्वेवेदाः जायन्ते। सख्यरसात्सर्वोपनिषदो जायन्ते। सख्यरसात्सर्वेमन्त्राः जायन्ते। सख्यरसात्सर्वेसिद्धाः जायन्ते। सख्यरसात्पञ्च महाभूतानि जायन्ते। सख्यरसात्सर्वे जडचेतनाःजायन्ते। अतो ब्रह्मवित्सर्वं स्त्रीपुन्नपुंसकात्मकं विश्वं सख्यात्मकं पश्यति। यस्मादितरन्नकिञ्चिदिति। नित्यभेदं। नित्योऽभेदो। नित्योऽभेदो। नित्योऽभेदो विवेचनीयोब्रह्मविद्भिः। हरि ॐ पूर्णमद इति शान्तिः।

इत्यथर्वणवेदीयपिप्पलीय शाखायां सख्योपनिषद् समाप्ता